# प्राक्कथनम्

**प्राक्कथनम्**

**व्याकरणशास्त्रप्रवेशार्थं नूतनपाठ्यसामग्र्याः आवश्यकता**

यथा समाजे आवश्यकताः जायन्ते तथा सामग्र्यः निर्मातव्याः भवन्ति। कीदृशसामग्र्याः अपेक्षा अद्यत्वे वर्तते यदिदानीं नोपलभ्यते?

नैकविधाः जिज्ञासवः समाजे उपलभ्यन्ते। तथाहि,

- साम्प्रदायिकक्रमेण समग्रं शास्त्रम् अध्येतुमीहमानाः व्याकरणशास्त्रस्य परिचयं प्रेप्सवः केचन
- संस्कृतसम्भाषणं ज्ञात्वा तदाधारभूतं व्याकरणशास्त्रम् अध्येतुमासक्ताः अन्ये
- शास्त्रान्तराध्ययनयोग्यताप्राप्त्यै व्याकरणज्ञानं काङ्क्षन्तः इतरे
- अन्तश्शास्त्रीयक्षेत्रेषु कार्यं कर्तुं सामान्यव्याकरणज्ञानं शास्त्रीयक्रमेण इच्छन्तः अपरे

ईदृशेभ्यः जनेभ्यः वर्षात्मके काले अष्टाध्यायीक्रमस्य अपरित्यागेन व्याकरणं पाठयितुं सुलभः उपायः कः? नैते समग्रं शास्त्रम् स्तरेऽस्मिन् अध्येतुमिच्छन्ति। एतादृशानां प्रयोजनाय ग्रन्थाः प्रायः विरलाः इति भाति। एतद्दृष्ट्या कृतमिदं कार्यम्।

पूर्वोक्तः अधिकारी वर्षात्मके काले व्याकरणशास्त्रमधीत्य कीदृशं सामर्थ्यं प्राप्तुमिच्छति –

- कानिचन प्रसिद्धानां सूत्राणां ज्ञानं भवेत्
- सरलश्लोकानां प्रकृतिप्रत्ययविभागपूर्वकम् अर्थज्ञाने सामर्थ्यं भवेत्
- व्याकरणशास्त्रस्य प्रक्रियाभागस्य स्वरूपं सम्यक्तया अवगतं भवेत्
- प्रसिद्धानां शब्दानां प्रकृतिप्रत्ययोहनसामर्थ्यं वर्धेत
- प्रयुज्यमानस्य साधुशब्दस्य पृष्ठभूमिका ज्ञाता भवेत्
- व्याकरणाध्ययनम् अनुवर्तयितुं स्पष्टा दृष्टिः लब्धा स्यात्

एतादृशापेक्षापूरणाय पाठ्यविधानं किञ्चित् भवेत्। कीदृशं पाठ्यविधानम् एतादृशं सामर्थ्यम् आसादयति? यद्येते अंशाः तत्र वर्तन्ते तर्हि इदं सिद्ध्येत् –

- अष्टाध्याय्याः स्वरूपस्य व्याकरणशास्त्रपरम्परायाः च परिचायनम्
- अष्टाध्याय्याः अधिगमप्रकारस्य उपस्थापनम्
- प्रधानानां सूत्राणाम् अष्टाध्यायीक्रममाश्रित्य निरूपणम्

- आधिक्येन उपयुज्यमानानाम् एव प्रत्ययादीनां कथनम्
- चित्रादीनाम् उपयोगेन सरलतया विषयोपस्थापनम्
- प्रचुरप्रयोगान् आदृत्य बहुविधाभ्यासप्रदानम्
- सुभाषितादिषु नियमानामन्वयप्रदर्शनम्

**नूतनपाठ्यसामग्र्याः स्वरूपम्**

इदं सर्वं मनसि निधाय अष्टाध्यायीप्रवेशः इति ग्रन्थः मया लिखितुं संकल्पितः। पूर्वोक्तावश्यकतां पूरयितुम् उपर्युक्तानाम् अंशानां समायोजनेन एतानि १९ प्रकरणानि मया परिकल्पितानि –

१. व्याकरणशास्त्रस्य परम्परा
२. वर्णाः
३. अष्टाध्याय्याः विषयः
४. संज्ञाः
५. अष्टाध्याय्याः अवगमनम्
६. अच्सन्धिः
७. हल्सन्धिः
८. विसर्गसन्धिः
९. सुबन्ताः
१०. संख्याशब्दाः
११. अव्ययानि
१२. विभक्त्यर्थाः
१३. प्रसिद्धाः केचन धातवः
१४. सनादिप्रत्ययाः
१५. कृत्प्रत्ययाः
१६. तिङ्प्रत्ययाः
१७. तद्धिताः
१८. लिङ्गनिर्णयः
१९. समासः

**प्राक्कथनम्**

अस्य ग्रन्थस्य एते विशेषाः –

- एकस्मिन् वत्सरे व्याकरणशास्त्रस्य परिचयम् अनल्पशब्दानां प्रक्रियोहनसामर्थ्यं च प्राप्नोति।
- २८ प्रसिद्धकृत्प्रत्ययाः, २९ तद्धितप्रत्ययाः, ४० प्रसिद्धाः धातवः च अत्र सार्थम् उपन्यस्ताः।
- उपपञ्चशतैः सूत्रैः सर्वे विषयाः निरूपिताः।
- प्रतिप्रकरणं शतशः उदाहरणानि विषयस्य दार्ढ्यं जनयन्ति।